# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

### अध्याय १६

कृताभिषेको रामस्तु सीता सौमित्रिरेव च ।
तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमम् ॥ १ ॥

आश्रमं तमुपागम्य राघवः सहलक्ष्मणः ।
कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् ॥ २ ॥

स रामः पर्णशालायामासीनः सह सीतया ।
विरराज महाबाहुश्चित्रया चन्द्रमा इव ।
लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ३ ॥

तदासीनस्य रामस्य कथासंसक्तचेतसः ।
तं देशं राक्षसी का चिदाजगाम यदृच्छया ॥ ४ ॥

सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः ।
भगिनी राममासाद्य ददर्श त्रिदशोपमम् ॥ ५ ॥

सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् ।
सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ६ ॥

राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ।
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ७ ॥

सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ।
विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ ८ ॥

प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना ।
तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ९ ॥

न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ।
शरीरजसमाविष्टा राक्षसी राममब्रवीत् ॥ १० ॥

जटी तापसरूपेण सभार्यः शरचापधृक् ।
आगतस्त्वमिमं देशं कथं राक्षससेवितम् ॥ ११ ॥

एवमुक्तस्तु राक्षस्या शूर्पणख्या परन्तपः ।
ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १२ ॥

आसीद्दशरथो नाम राजा त्रिदशविक्रमः ।
तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १३ ॥

भ्रातायं लक्ष्मणो नाम यवीयान्मामनुव्रतः ।
इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १४ ॥

नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ।
धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः ॥ १५ ॥

त्वां तु वेदितुमिच्छामि कथ्यतां कासि कस्य वा ।
इह वा किंनिमित्तं त्वमागता ब्रूहि तत्त्वतः ॥ १६ ॥

साब्रवीद्वचनं श्रुत्वा राक्षसी मदनार्दिता ।
श्रूयतां राम वक्ष्यामि तत्त्वार्थं वचनं मम ॥ १७ ॥

अहं शूर्पणखा नाम राक्षसी कामरूपिणी ।
अरण्यं विचरामीदमेका सर्वभयङ्करा ॥ १८ ॥

रावणो नाम मे भ्राता राक्षसो राक्षसेश्वरः ।
प्रवृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः ॥ १९ ॥

विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ।
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ २० ॥

तानहं समतिक्रान्ता राम त्वापूर्वदर्शनात् ।
समुपेतास्मि भावेन भर्तारं पुरुषोत्तमम् ।
चिराय भव भर्ता मे सीतया किं करिष्यसि ॥ २१ ॥

विकृता च विरूपा च न सेयं सदृशी तव ।
अहमेवानुरूपा ते भार्या रूपेण पश्य माम् ॥ २२ ॥

इमां विरूपामसतीं करालां निर्णतोदरीम् ।
अनेन सह ते भ्रात्रा भक्षयिष्यामि मानुषीम् ॥ २३ ॥

ततः पर्वतशृङ्गाणि वनानि विविधानि च ।
पश्यन्सह मया कान्त दण्डकान्विचरिष्यसि ॥ २४ ॥

इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम् ।
इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ २५ ॥

।

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com